# amRitabindu

# અમૃતબિન્દુ

## Document Information

Text title : amRitabindu upanishad

File name : amrtabindu_upan.itx

Category : upanishhat, upanishad

Location : doc_upanishhat

Author : Anshuman

Transliterated by : Anshuman Pandey pandey at umich.edu

Proofread by : M. Giridhar, Sunder Hattangadi

Latest update : 16 April 1996, March 4, 2017

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 28, 2021

*sanskritdocuments.org*

# અમૃતબિન્દુ

ॐ સહ નાવવતુ સહ નૌ ભુનક્તુ સહ વીર્યં કરવાવહૈ ।
તેજસ્વિનાવધીતમસ્તુ મા વિદ્વિષાવહૈ ॥  ॐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ।
હરિઃ ॐ ॥

મનો હિ દ્વિવિધં પ્રોક્તં શુદ્ધં ચાશુદ્ધમેવ ચ ।
અશુદ્ધં કામસંકલ્પં શુદ્ધં કામવિવર્જિતમ્ ॥ ૧॥

મન એવ મનુષ્યાણાં કારણં બન્ધમોક્ષયોઃ ।
બન્ધાય વિષયાસક્તં મુક્ત્યૈ નિર્વિષયં સ્મૃતમ્ ॥ ૨॥

યતો નિર્વિષયસ્યાસ્ય મનસો મુક્તિરિષ્યતે ।
અતો નિર્વિષયં નિત્યં મનઃ કાર્યં મુમુક્ષુણા ॥ ૩॥

નિરસ્તવિષયાસઙ્ગં સંનિરુદ્ધં મનો હૃદિ ।
યદાઽઽયાત્યાત્મનો ભાવં તદા તત્પરમં પદમ્ ॥ ૪॥

તાવદેવ નિરોદ્ધવ્યં યાવદ્ધૃદિ ગતં ક્ષયમ્ ।
એતજ્જ્ઞાનં ચ ધ્યાનં ચ શેષો ન્યાયશ્ચ વિસ્તરઃ ॥ ૫॥

નૈવ ચિન્ત્યં ન ચાચિન્ત્યં ન ચિન્ત્યં ચિન્ત્યમેવ ચ ।
પક્ષપાતવિનિર્મુક્તં બ્રહ્મ સમ્પદ્યતે તદા ॥ ૬॥

સ્વરેણ સંધયેદ્યોગમસ્વરં ભાવયેત્પરમ્ ।
અસ્વરેણાનુભાવેન નાભાવો ભાવ ઇષ્યતે ॥ ૭॥

તદેવ નિષ્કલં બ્રહ્મ નિર્વિકલ્પં નિરઞ્જનમ્ ।
તદ્બ્રહ્માહમિતિ જ્ઞાત્વા બ્રહ્મ સમ્પદ્યતે ધ્રુવમ્ ॥ ૮॥

નિર્વિકલ્પમનન્તં ચ હેતુદૃષ્ટાન્તવર્જિતમ્ ।
અપ્રમેયમનાદિં ચ યજ્જ્ઞાત્વા મુચ્યતે બુધઃ ॥ ૯॥

ન નિરોધો ન ચોત્પત્તિર્ન બદ્ધો ન ચ સાધકઃ ।

ન મુમુક્ષુર્ન વૈ મુક્ત ઇત્યેષા પરમાર્થતા ॥ ૧૦॥   var મુક્તઃ
એક એવાત્મા મન્તવ્યો જાગ્રત્સ્વપ્નસુષુપ્તિષુ ।
સ્થાનત્રયવ્યતીતસ્ય પુનર્જન્મ ન વિદ્યતે ॥ ૧૧॥

એક એવ હિ ભૂતાત્મા ભૂતે ભૂતે વ્યવસ્થિતઃ ।
એકધા બહુધા ચૈવ દૃશ્યતે જલચન્દ્રવત્ ॥ ૧૨॥

ઘટસંવૃતમાકાશં નીયમાનો ઘટે યથા ।
ઘટો નીયેત નાકાશઃ તદ્વજ્જીવો નભોપમઃ ॥ ૧૩॥

ઘટવદ્વિવિધાકારં ભિદ્યમાનં પુનઃ પુનઃ ।
તદ્ભેદે ન ચ જાનાતિ સ જાનાતિ ચ નિત્યશઃ ॥ ૧૪॥   ?var તદ્ભગ્નં
શબ્દમાયાવૃતો નૈવ તમસા યાતિ પુષ્કરે ।
ભિન્ને તમસિ ચૈકત્વમેક એવાનુપશ્યતિ ॥ ૧૫॥

શબ્દાક્ષરં પરં બ્રહ્મ તસ્મિન્ક્ષીણે યદક્ષરમ્ ।
તદ્વિદ્વાનક્ષરં ધ્યાયેદ્યદીચ્છેચ્છાન્તિમાત્મનઃ ॥ ૧૬॥

દ્વે વિદ્યે વેદિતવ્યે તુ શબ્દબ્રહ્મ પરં ચ યત્ ।
શબ્દબ્રહ્મણિ નિષ્ણાતઃ પરં બ્રહ્માધિગચ્છતિ ॥ ૧૭॥

ગ્રન્થમભ્યસ્ય મેધાવી જ્ઞાનવિજ્ઞાનતત્પરઃ ।
પલાલમિવ ધાન્યાર્થી ત્યજેદ્ગ્રન્થમશેષતઃ ॥ ૧૮॥

ગવામનેકવર્ણાનાં ક્ષીરસ્યાપ્યેકવર્ણતા ।
ક્ષીરવત્પશ્યતે જ્ઞાનં લિઙ્ગિનસ્તુ ગવાં યથા ॥ ૧૯॥

ઘૃતમિવ પયસિ નિગૂઢં ભૂતે ભૂતે ચ વસતિ વિજ્ઞાનમ્ ।
સતતં મનસિ મન્થયિતવ્યં મનો મન્થાનભૂતેન ॥ ૨૦॥

જ્ઞાનનેત્રં સમાધાય ચોદ્ધરેદ્વહ્નિવત્પરમ્ ।
નિષ્કલં નિશ્ચલં શાન્તં તદ્બ્રહ્માહમિતિ સ્મૃતમ્ ॥ ૨૧॥

સર્વભૂતાધિવાસં યદ્ભૂતેષુ ચ વસત્યપિ ।
સર્વાનુગ્રાહકત્વેન તદસ્મ્યહં વાસુદેવઃ ॥ ૨૨॥

ૐ સહ નાવવતુ સહ નૌ ભુનક્તુ સહ વીર્યં કરવાવહૈ ।
તેજસ્વિનાવધીતમસ્તુ મા વિદ્વિષાવહૈ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ।

હરિઃ ૐ ॥

॥ ઇતિ કૃષ્ણ યજુર્વેદેઽમૃતબિન્દૂપનિષત્ સમાપ્તા ॥

Encoded by Anshuman Pandey pandey at umich.edu

Proofread by M. Giridhar, Sunder Hattangadi

*amRitabindu*

pdf was typeset on March 28, 2021

Please send corrections to *sanskrit@cheerful.com*